दिनाङ्क :- 28/02/2025 सायम् - 06:20

मुख्यवार्ता:

- भारत-यूरोपीयसङ्घ-इत्येतौ व्यापार-निवेश-प्रौद्योगिकी-नवाचार-हरितोर्जा-सम्पर्कसौविध्येषु अथ च जनानां मध्ये सम्बन्धेषु गहन-सहभागितायाः कृते स्वप्रतिबद्धतां प्रकटितवन्तौ।
- वर्षान्तं यावत् भारतं क्षयरोगात् मुक्तं भविष्यतीति केन्द्रीयस्वास्थ्यमन्त्रिणा सूचितम्।
- अमेरीकीय-राष्ट्रपतिना डोनाल्ड्-ट्रम्प इत्यनेन चीनदेशात् आयाते प्रदीयमानं दशप्रतिशतम् अतिरिक्त-शुल्कम् उद्घोषितम्।
- कर्मचारी-भविष्यनिधि-सङ्घटनेन पञ्चविंशत्यधिक-द्विसहस्रतमाय वित्तीयवर्षाय द्वि पञ्च दशांशोत्तर अष्टप्रतिशत-मितस्य समान-वृद्धिमानं भवेत् इति अनुशंसितम्।
- हिमाचल-प्रदेश-जम्मू-कश्मीरयोः अतिवृष्ट्या हिमपातेन च सामान्य-जनजीवनं प्रभावितम्। तत्रैव जम्मू-कश्मीरे विद्यालयानां शीतकालिक-अवकाशः मार्च- मासस्य षड्दिनाङ्कं यावत् संवर्धितः।

यूरोपीयागोयस्याध्यक्षा:

प्रधानमन्त्री नरेनद्र मोदी यूरोपीयायोगस्य अध्यक्ष्या उर्सुला-वॉन-डेर-लेयेन-इत्यनया साकं अद्य नवदिल्ल्यां प्रतिनिधिमण्डलस्तरीयां वार्तां समाचारितवान्। वार्ताविधौ उभौ पक्षौ व्यापार-निवेश प्रौद्योगिकी-नवाचार-हरितोर्जा-सम्पर्कसौविध्येषु अथ च जनानां मध्ये सम्बन्धेषु गहन सहभागितायाः कृते स्वप्रतिबद्धतां प्रकटितवन्तौ। वार्तानन्तरं एकस्मिन् संयुक्त-वक्तव्ये प्रधानमन्त्रिणा नरेन्द्रमोदिना भणितं यत् भारत-यूरोपीयायोगयोः मध्ये दशकद्वयं प्राचीनं कार्यनीतिक-सहभागित्वं स्वाभाविकं जैविकं च वर्तते। असौ अग्रे अवोचत् यत् एतस्य मूले च विश्वास-लोकतान्त्रिकमूल्ययोः पारस्परिक विश्वासाय प्रगतये समृद्धये च संयोजितप्रतिबद्धता निहितास्ति। प्रधानमन्त्रिणा अग्रे निगदितं यत् भारत-यूरोपीय-सङ्घयोः मध्ये सहभागितां वर्धयितुं गतिं च प्रदातुम् अनेके निर्णयाः गृहीताः।

स्वकीये सम्बोधने प्रधानमन्त्री प्रत्यपादयत् यत् सम्पर्क-सौविध्यं समेधितुं भारत-मध्य-पूर्व-यूरोपार्थिक-वीथ्याम् अग्रे संवर्धनाय प्रबलपदक्षेपाः उत्थापयिष्यन्ते।

प्रधानमन्त्रिणा सबलं प्रख्यापितं यत् आन्तर्जालिकापराध-सागरीयसुरक्षा-आतङ्कवाद-प्रतिरोधेषु सहयोगः अग्रे वर्धमानो भविष्यति। प्रधानमन्त्री पुनः हिन्द-प्रशान्त-महासागरोपक्रमे सम्मिलितस्य यूरोपीयसङ्घस्य निर्णयस्य स्वागतं व्याहृतवान्। यूरोपीयायोगस्य अध्यक्षा उर्सुला-वॉन-डेर-लेयेन इत्येषा स्वकीये सम्बोधने निगदितवती यत् भारतं यूरोपस्य समान विचारधारायुतं मित्रराष्ट्रं वर्तते। प्रधानमन्त्रिणः मोदिनः च नेतृत्वे सम्बन्धोऽयं सुदृढो जातः। भारत-यूरोप-इत्येतौ पारस्परिक-विश्वासैः मूल्यैः च संयुतौ स्तः। उभौ पक्षौ च नवीने कार्यनीतिक-प्रभागे कार्यं सम्पादयितुं सहमतौ जातौ। अनया समुदीरितं यत् यूरोपः पूर्वमेव भारतस्य बृहत्तमः व्यापारिक-सहभागी वर्तते। अध्यक्षा वॉन-डेर-लेयेन-इत्येषा द्वाविंशति-सङ्ख्यकैः यूरोपीय-सङ्घायुक्तैः सह भारतस्य द्विदिवसीययात्रायां नवदिल्लीं सम्प्राप्तवती।

नड्डा

केन्द्रीय स्वास्थ्य-परिवार-कल्याण-मन्त्री जे पी नड्डा: अवदत् यत् वर्षान्तं यावत् भारतात् क्षयरोगस्य निर्मूलनार्थं सर्वा: प्रयत्ना: विहिता:। असौ कथितवान् यत् यद्यपि विश्वं त्रिंशदधिक-द्विसहस्रतमं वर्षं यावत् सार्वजनिक-स्वास्थ्य-प्रतिरोधरूपेण क्षयरोगस्य समाप्त्यर्थं प्रतिज्ञातवान् तथापि अस्मिन् विषये येन प्रकारेण कार्यं प्रचलितं, तत् अद्भुतम् अस्ति तथा च अस्मिन् वर्षे देश: क्षयरोगस्य समाप्तिं कर्तुं शक्नुयादिति।

ओडिशाया: पुरीनगरे अद्य प्रात: काले ''भारते सार्वजनिक-स्वास्थ्य-सेवा प्रणाल्याम् उत्तमम् अनुकरणीयाचरणं नवाचार: च'' इत्येतस्मिन् विषये नव-राष्ट्रिय-शिखर-सम्मेलनस्य-उद्घाटनं कुर्वन् श्रीनड्डा: उक्तवान् यत् सप्तदशाधिक-द्विसहस्रतमे वर्षे प्रशासनेन नवस्वास्थ्य-नीतिम् स्वीकृतानन्तरं-बहूनि परिवर्तनानि सञ्जातानि।

राष्ट्रपति:

राष्ट्रपतिपदासीना द्रौपदी मुर्मु: न्यायाधारितं विकसितभारतम् आकारयितुं न्यायचिकित्सकीय-विज्ञानस्य महत्वपूर्ण-भूमिकां प्रकाशितवती। अद्य गांधीनगरे राष्ट्रिय-न्यायचिकित्सकीय-विज्ञान-विश्वविद्यालयस्य-तृतीयं दीक्षान्तसमारोहं सम्बोधयन्ती राष्ट्रपति: विकसितभारतस्य परिकल्पनां प्रकाशितवती यत् भारतीयपरम्पराम् आधुनिकतया सह संयोजयति तथा च सर्वेभ्य: न्यायं सुनिश्चितं करोति इति।

जहॉं. ए-खुसरो-2025

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदेहलीस्थे सुन्दर-नर्सरी इत्येतस्मिन् उद्याने समायोक्ष्यमाणे पञ्चविंशत्यधिकद्विसहस्रतमवर्षे 'जहान्-ए खुसरो, ' इत्येतस्मिन् कार्यक्रमे भागं ग्रहिष्यति। अस्य भव्य-सूफी-संगीत-महोत्सवस्य सम्प्रति 'रजत-जयन्ती' आमान्यते। एष: महोत्सव: 'अमीर खुसरो' इत्येतस्य भव्यनिधि-सन्निधाने समायोज्यते, यत्र अशेष-विश्वस्य सर्वोत्तमा: कलासंगीतविशिष्टसन्धारका: जना: भागं गृह्णन्ति। प्रधानमन्त्री नरेन्द्रमोदी देशस्य विविधकलासंस्कृतिसम्वर्द्धकेषु विशिष्ट प्रबलसमर्थकत्वेन गण्यते। रूमी फाउंडेशन इत्यनेन समायोजितस्य अस्य महोत्वस्य प्रारम्भ: एकाधिक द्विसहस्रतमे वर्षे प्रसिद्ध-चलचित्र निर्मात्रा कलाकारेण च मुजफ्फर अली इत्यमुना कृत: आसीत्। महोत्सवावधौ प्रधानमन्त्री नरेन्द्रमोदी हस्तनिर्मितवस्तूनां आपणे 'तेह' इत्यत्रापि भ्रमणं करिष्यति, यत्र हस्त-उत्पाद-शिल्प-कलाकृतय:, लघुचलचित्राणि अपि प्रदर्शयिष्यन्ते।

राष्ट्रीय विज्ञान दिवस:

अद्य सम्पूर्णे अपि देशे राष्ट्रिय-विज्ञान-दिवस: आमान्यते। अयं दिवस: प्रतिवर्षं फरवरीमासस्य अष्टाविंशति दिनाङ्के प्रसिद्धस्य भौतिक वैज्ञानिकस्य सर् सी.वी. रमन-वर्य द्वारा 'रमन प्रभाव' इत्येतस्य अविष्कारोपलक्ष्ये आमान्यते। अस्मै अविष्काराय सर्-रमन-वर्यं त्रिंशदधिक-नवदशशततमे वर्षे नोबेल-इत्याख्येन पुरस्कारेण सम्मानित:। भारतीयान्तरिक्षानुसन्धान-सङ्घटनस्य अध्यक्ष: डॉ. वी.

नारायणन् इत्येषः आकाशवाण्या सह साक्षात्कारसमये इसरो इत्येतस्य सङ्घटनस्य प्रमुखोपलब्धिषु वार्तां कृतवान्। प्रधानमन्त्रिणा नरेन्द्र मोदिना राष्ट्रिय विज्ञान दिवसावरे सर्वेभ्यः शुभकामनाः प्रदत्ताः। विज्ञान प्रौद्योगिकीमन्त्री डॉ. जितेन्द्र-सिंहः अद्य अवदत् यत् देशेन चन्द्रयान-तृतीयं, सौराभियानं, Spadex सदृशैः विश्वपटले स्वक्षमता सफलतया प्रदर्शिता।

कर्मचारी-भविष्य-निधि-सङ्घटनम्

कर्मचारी-भविष्यनिधि-सङ्घटनस्य केन्द्रिय-न्यासी-मण्डलेन पञ्चविंशत्यधिक-द्विसहस्रतम-वित्तीयवर्षाय कर्मचारि-भविष्यनिधि-न्यासे द्वि पञ्च दशांशोत्तर अष्टप्रतिशत मितस्य समान-वृद्धिमानं भवेत् इति अनुशंसितम्।

ऋतुपरिवर्तनम्

हिमाचल-प्रदेशस्य अधिकांशभागेषु अद्य निरन्तरं तृतीयदिवसे अपि अतिवृष्टिः हिमपातः च जायेते, येन दैनन्दिनजीवनं प्रभावितं जातम्। हिमपातेन भू-स्खलेन अनेकेषु चतुर्षु जनपदेषु सर्वाणि शैक्षणिक-संस्थानानि अद्य पिहितानि सन्ति। प्रचण्डहिमपातेन रामसू-काजीगुण्ड-भागयो मध्ये हिमसञ्चयस्य कारणात-श्रीनगर-जम्मू-राष्ट्रिय-राजमार्गः निरूद्धः अस्ति। कश्मीरोपत्यकायां विद्यमान-वायुगुणेन उच्चमाध्यमिक-स्तरपर्यन्तं विद्याललयाः अधुना मार्चमासस्य सप्तदिनाङ्कात् पुनः उद्घाटयन्ते।

संयुक्तराष्ट्रम्

राष्ट्रपतिः डोनाल्ड-ट्रम्प-इत्यसौ आगामिनः मङ्गलवासरात् आरभ्य कनाडा-मेक्सिको-देशयोः आयातशुल्कं विवर्धयितुं स्वयोजनायाः घोषणाम् अकरोत्। अपि च चीनदेशात् आयाते प्रदीयमानं दशप्रतिशतं सार्वत्रिक-शुल्कं द्विगुणीकृतवान्। एषा घोषणा तदा प्रसारिता यदा मेक्सिको-कनाडा-देशयोः अधिकारिणः एतस्याः योजनायाः निवारणार्थं चर्चायै वॉशिंगटन-नगरे आसन्।

।। इति वार्ताः।।